National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(61): 223-225
© 2025 NJHSR
www.sanskritarticle.com

**Eslavath Saritha**
Research Scholar,
Department of Sahitya,
National Sanskrit University,
Tirupati

**Correspondence:**
**Eslavath Saritha**
Research Scholar,
Department of Sahitya,
National Sanskrit University,
Tirupati

# कविकर्णरसायनकाव्ये महाकाव्यलक्षणानि।

**Eslavath Saritha**

सर्गबन्धो महाकाव्यमित्यादि प्राचीनालङ्कारिकैः प्रोक्तानि काव्यलक्षणानि सर्वाणि कविकर्णरसायकाव्ये दृश्यन्ते।

**(A).सर्गबन्धत्वम्→** कथाविभाग क्रमेण द्वादशसर्गः काव्ये निबद्धाः। यदर्थं सर्गो विभक्तः तत्प्रयोजनम् अपि सर्गान्ते प्रतिसर्गं नामाङ्कनेन कविना सूचितम्। सर्गस्थो विषयः श्लोकाश्च पट्टिका रूपेण काव्यस्वरूपनिरूपणे दर्शिताः। अपि च सर्गाः अपि अनतिविस्तीर्णाः। छन्दांसि अपि भिन्नानि प्रयुक्तानि। प्रतिसर्गं सर्गान्ते भिन्नवृत्तप्रयोगः कृतः।छन्दो विशेषास्तु अग्रे दर्शिताः।

**(B) मङ्गलाचरणम् →** ईश्वरस्तुत्या आशीरूपया मङ्गलाचरणं कृतम्।

**(C) इतिवृत्तम् →** शिवकथाः शैववाङ्मये बहुधा प्रसिद्धाः। पुराणेषु न दृष्टाः अपि प्राचीनकथाः सर्वाः इतिहासाः भवन्त्येव। इतिहासः = पुरावृत्तम् इत्यमरः। शैववाङ्मय इतिहासे चोलराजकथा प्रसिद्धा शिवभक्त विषयत्वात् सदाश्रयापि भवति।

**(d).चतुर्वर्गफलायत्तम् →** धर्मार्थकाममोक्षाः चत्वारः पुरुषार्थाः। चतुर्णां वर्गः चतुर्वर्गः सर्वे पुरुषार्थाः इत्यर्थः। तेषां फले आयत्तं अधी कविकर्णरसायनकाव्ये चत्वारः पुरुषार्थाः अपि वर्णिताः। तत्र धर्मपुरुषार्थो- **यथा-**
विक्रमचोलेन राज्यपालने राजधर्मः सम्यक्तया निरूढः। सर्वेषां पुरुषार्थानां फलायत्तत्वं पृथक् शीर्षिका रूपेण विवृतम्।

**(e) चतुरोदात्तनायकम्**

चतुरः उदात्तश्च नायकः यस्मिन् तत् चतुरोदात्तनायकम्। चतुरः= समर्थः उदात्तः=उदारशीलः। एवं चातुर्यमौदार्यं च द्वितयं यस्मिन् वर्तते स चतुरोदात्त नायकः। भक्तिरसप्रधाने अस्मिन् काव्ये मानकञ्जारः सुन्दरचोलश्च द्वावपि नायकौ भवितुमर्हतः। किन्तु युवा एव नायकः काव्येषु वर्ण्यते। सप्तमसर्गान्ते मानकञ्जारस्य कथा समाप्ता स च चतुरः उदारोपि फलस्वाम्यं तेन न निरूढम् इति सुन्दरचोलः एव नायको भवितुमर्हति। काव्यस्य चोलभूपालीयमिति नामान्तरमपि सुन्दरचोलस्यैव नायकत्व स्थापकम्।राज्यप्राप्तिः कन्यालाभश्च आधिकारिकमितिवृत्तम् तत् येन निवृत्तं सः अधिकारी नायकश्च भवति यदाहुः-

**अधिकारः फलस्स्वाम्यमधिकारी च तत्प्रभुः।**
**तन्निर्वृत्तमभिव्यापि वृत्तंस्यादाधिकारिकम्॥**

नायिका सोमप्रभा तया विवाहः मानकञ्जारस्य पुत्रः न वर्णितः इति करिपुर कुसुम पुरयोः सुन्दरचोलः एव शासकः। सर्वे सामन्ताः तस्य विधेयाः इति हेतोः अयं चतुरः उदात्तश्च। एकदशसर्गान्ते उद्यानपालादीभ्यः आभरणादीनि दत्तवान् इति हेतोः उदात्तश्च। विशेषतः शिवभक्तः इत्युदात्तः। नायिकापि कुलजा स्वीया। एवं चतुरोदात्तौ नायकौ यस्मिन् तत् चतुरोदात्तनायकम्। (नायिका च नायकश्च नायकौ)।

**(f). अष्टादशवर्णानि**

नगरार्णवशैलर्तु...इति उदाहृतेषु वर्णनेषु केवलं मधुपान वर्णनमेव काव्ये न दृष्टम्। दण्डिना अनुक्तान्यपि मृगयादि वर्णनानि अधिकाव्यपि काव्ये वर्तन्ते।

1. **नगरवर्णनम्→**

काव्ये विक्रमचोलस्य राजधानी करिपुरं मानकञ्जारस्य राजधानी कुसुमपुरमिति नगरद्वयवर्णनं दृश्यते।तृतीयसर्गे त्रिंशदधिकैः श्लोकैः करिपुरवर्णनं दृश्यते। नगरेषु हर्म्याणां, रथगजादीनां विलासिनीनां च वर्णनं प्रायशः कविभिः वर्ण्यते। किन्तु राज्ञः शिवभक्तत्वात् शिवालयवर्णनमपि पुरवर्णने विशेषतया दृष्टम्।

**पटहडिण्डिमशङ्खमृदङ्गक ध्वानिभिरद्भुतताण्डवविभ्रमैः।**
**जयजयस्वनभास्वदुघेरवैः गृहमराजत तत्र पुरद्विषः॥**
**हरगृहोत्थित धूपसमाकुलं रुचिरमम्बरमुन्नतसौरभम्।**
**स्नपनसारसुधार सधारया क्षितिरभून्मधुरा परितः पुरः॥**

**2. अर्णववर्णनम्**

अर्णवः इति समुद्रः = सरस्वान् सागरोऽर्णवः इत्यमरः। प्रथमसर्गे जम्बूद्वीपे

द्रविडतेश वर्णने समुद्रवर्णनं कृतम्।कथा प्रदेशः चोलदेशः द्रविड विषयस्थ एव। दक्षिणेन द्रविडं महान् समुद्रो वर्तते। ततः समुद्रवर्णनं नवभिः(1/61 तः 69) श्लोकैः कृतम।

**श्रियो जन्मस्थानं सुररिपुपुरीदुर्गपरिघ**
**बलद्विड्भीताद्रिप्रकरलसदज्ञातसदनम्।**
**विधोशशय्यावासाश्रित घृणिमहामज्जनसारः**
**क्षमाहाश्चीदामप्रथितमहिमा भाति जवधिः॥**

**3. शैलवर्णनम्-**

जम्बूद्वीपे स्नसङ्गवशात् आगतस्य मेरोः वर्णनं षड्विंशाति श्लोकैः (1/70 तः 95) कृतम्। अपि च पञ्चमसर्गे रत्नाचलस्यापि वर्णनं वर्तते। मेरुवर्णनात्मकम् एकम् उदाहरणम्- **यथा—**

**सुवर्ण श्रीयुक्तोऽप्यधिगतकुजातिस्मयकरः**
**सदाऽभ्रान्तस्थाय्यप्यनुगतमनोज्ञस्थिररुचिः।**
**मरुत्केलीवासोऽप्यविकलमहानागमहितः**
**स्फुरत्पञ्चास्योऽप्यच्युतिमदगजोऽयं सुरगिरिः॥**

**4.ऋतुवर्णनम्**

अष्टमसर्गे नवमसर्गे च षण्णामपि ऋतूनां वर्णनं वर्तते। सोमप्रभासुन्दचोलयोः विवाहानन्तरं काञ्चित्कालं सुन्दरचोलः कुसुमपुरे उषितवान्। तत्र ऋतु त्रयस्य वर्णनं अष्टमसर्गे वर्तते। मानकञ्जारः शिवसायुज्यं प्राप्तवान् इति हेतोः तस्यापि राज्यभारं निर्वहणाय सुन्दरचोलः तत्र तावन्तं कालं स्थितः स्यात्। वर्षाकालात् आरभ्य ग्रीष्मान्तो भागः वर्णित इति हेतोः प्रयशः संवत्सरं उषितवान् इति ज्ञेयम्। तत्र

**(a) प्रावृड्वर्णनं यथा**

**ध्वनिर्घनौघस्य मृदङ्गनिस्वनः शिलीरवस्तालनिकायनिक्वणः।**
**कलापिनां ताण्डवडम्बरे बभौ चलत्तटीजर्झरदण्डविभ्रमः॥**

**(b) हेमन्तवर्णनं यथा-**

**द्विजाभिधा नैव पिकस्य युज्यते**
**विजातिजस्येति विधाय मूकताम।**
**मुदं व्युदस्यास्य सदग्रजन्मनो**
**व्यधाद्वुजं हैमऋतुर्द्विजेशितुः॥**

अत्र हैम ऋतुः इत्यत्र आद्गुणः इति गुणो भवत्येव। हैमर्तुः इति सन्धिपदप्रयोगेण छन्दोभङ्गः भवति ततः “ऋत्यकः” इति पाक्षिकः प्रकृतिभावोऽत्र विहितः।

**(c). ग्रीष्मवर्णनं यथा –**

**न चेन्नदी चन्द्रधरवृमीशितुः न चेत्पयोराशिनिवासिताह्नरेः।**
**न चेत्सरोजासनता विधेरिमे कथं तरेयुर्व्यसनं निदाघजम्॥**

नवमसर्गे सुन्दरचोलः कुसुमपुरात् पुनः करिपुसमागतः। तत्र सर्गे वसन्त वर्णनं वर्तते।

**(d) वसन्तवर्णनं यथा-**

**वक्त्रं प्रफुल्लमभवत्प्रथमं वधूनां पद्मं ततस्तनुरभूल्ललिता लता च।**
**पश्चात्पुरस्फुरितमासं कपोलमासां पूर्णेन्दु बिम्बमथ याति तदा वसन्ते॥**

काव्ये शरदः शिशिरस्य वर्णनं न दृष्टम्।

5. **चन्द्रोदयवर्णनम्**

सोमप्रभा सौधाग्रात् नगरं प्रविशन्तं सुन्दरचोलं दृष्ध्वा पूर्वराग विप्रलम्भेन बादिताभूत्। तदानीं तस्याः विरहवर्णने विप्रलम्भ-श्रृङ्गभूत तया दशभिः श्लोकैः चन्द्रोदयो वर्णितः। (6/51तः61)

**सारदीधितिरुदात्ततारकः स्फारलक्ष्मनवपक्ष्म विभ्रमः।**
**व्योम विष्णुनयनश्रियं दधौ पूरितामृतनिधिः कलानिधिः॥**

6. **सूर्योदयवर्णनम्**

एकादशसर्गे वीथिका विहारं कृत्वा गृहमागत्य रात्रौ शिवपूजा तत्परोऽभूत्। पूजान्ते प्रभात सूचकः शङ्खध्वनिरपि वर्णितः। ततः द्वादशसर्गे सूर्योदयवर्णनं वर्तते।

**कुमुदं निरुध्य परिह्वत्य सद्वुचिं परिभूय लोकसुखदं कलानिधिम्।**
**भुवि लोकबन्धुरिति वर्ण्यते रविः भुवनोत्तरस्य सुगुणो हि दुर्गुणाः॥**

7. **उद्यानक्रीडावर्णनम्-**

दशमसर्गे वसन्ते उद्यानपालैः आहूतः राजा वनविहारार्यं उद्यानं जगाम। तत्र
उद्यानवर्णनं, उद्यानक्रीडा च वर्तते।

**स्मरशरत्वतुपेत्य हि बाधते विरहिणीरिति काऽपि रुषा वधूः।**
**स्मितमुखं पुरतो नवमल्लिका कुसुममाशु चकर्त नखाग्रतः॥**

8. **जलक्रीडावर्णनम्**

**भुवनजातजितस्सुदृशो दृशः कुवलयस्य जयेऽपि चकाकथा।**
**अनिमिषाऽभिभवोऽपि कृतः तयेत्यतिशयाय न चात्र सरोवरे॥**

9. **रतोत्सववर्णनम्**

रतोत्सववर्णनं सप्तमसर्गे सोमप्रभासुन्दरचोलय समागमवर्णने दृष्टम्।

**प्रेम्णा वीभाविधिरसकृदापीतबिम्बाधरोष्ठः**
**स्वीयद्वन्धः पुलकितवपुः स्वैरसंक्लृप्तबन्धः।**
**गाढाश्लेषो नखरदहतिव्यापृतिर्गद्गदोक्तिः**
**सम्भोगोऽभून्निभृतमनयोः कण्ठनादानुविद्धः॥**

## 10. विप्रलम्भवर्णनम्

विप्रलम्भो वियोगः वधूवरयोः समागमात् पूर्वरागरूपवियोगः अभिलाषा श्रृङ्गारनामकः काव्ये वर्णितः। कुसुमपुरं प्रविशन् गजारूढः पञ्चमसर्घे सोमप्रभया सुन्गरचोलः दृष्टः ततः आरभ्य सा विरहदूना बभूव। सोमप्रभा सखी सुभाषिणी सोमप्रभायाः विरहावस्थां मानकञ्जारस्य पुरः बहुधा वर्णितवती।

**बालिका बकुलपुष्पमालिका ग्रीष्मभानुकरशोषितेव सा।**
**दुर्दशामुपगता सखीजनः प्रेक्ष्य तां बहु विषादमाययौ॥**
**चन्दनं न सहते सुधाकरं न्यक्करोति च मधुं विनिन्दति।**
**गन्धवाहमपि मन्दमङ्गना नेहते नहि सरोऽवगाहते॥**

## 11. विवाहवर्णनम्

विवाहवर्णनमपि सोमप्रभासुन्दरचोलयोः विवाहे सप्तमसर्गे विस्तरेण वर्णितम्।

**शुभ्राम्भोजे विधिरिव गिरा संस्थितः पद्मषण्डे**
**सार्धं दीध्यन्नृ पतिरनया वज्रपर्यङ्कमध्ये।**
**नीतश्चार्द्राक्षतमथवहन् वृद्धकैः तां कराग्रात्**
**जग्राहाशीर्वचन निनदैश्श्राण्यमाङ्गल्यगीतैः॥**

## 12. कुमारोदयवर्णनम्

चकुर्थसर्गे सुन्दरचोल जननकाले कुमारोदय वर्णनम् यथा-

**सहचरीभिरनूनविनोदतः स्थितवती समये सुतरां शुभे।**
**सुतमसूत समुन्नतरोचिषं सुरमणी समणीयगुणं यथा॥**

## 13. मन्त्रालोचनवर्णनम्

मन्त्रालोचनवर्णनं द्वादशसर्गे पाण्ड्यं एकं अविधेयं श्रुत्वा राजा मन्त्रिभिः मन्त्रालोचनं करोति।

**इति भाषितेन वचसाऽरुणेक्षणः सचिवं जगाद स नृपस्तदाशयम्।**
**त्वमुपेत्य विद्धि यदि चेदनानतः क्षितिभृत्स याति पवितामसिर्मम॥**

## 14. द्यूतवर्णनम् (दूत्यवर्णनम्)

द्यूतवर्णनं काव्ये नदृष्टं किन्तु दूत्यमिति पाठः कैश्चिदङ्गीकृतः। तत्पक्षे सुन्दरचोलेन प्रेषिताः मन्त्रिणः पाण्ड्यान्तिकं दूताः ययुः। तद्वर्णनं दशाधिकैः श्लोकैः वर्तते।

**इति वक्तुरस्य नृपते नियोगतः सचिवस्समेत्य विभवाद्विचक्षणः।**
**पुरमाशु पाण्ड्यजनपस्य तत्सदः सदनान्तरालमविशत्तदीरितः॥**

## 15. प्रयाणवर्णनम्

प्रयाणवर्णनं त्रिषु चतुर्षु सन्दर्भेषु वर्तते। पञ्चमसर्गे पितुः नियोगात् सुन्दरचोलः कुसुमपुरं प्रस्थितः तत्र विस्तरेण तत्प्रयाणवर्णनं वर्तते।

**इन्द्रेभेन्द्रप्रतिमकरिणः स्कन्धपीठे निषण्णो**
**मुक्ताछत्रच्छविपरिमिलद्रत्नकोटीरकूटः।**
**दीव्यत्स्वर्णाभरण किरणैरावृतस्स्तुत्य कीर्तिः**
**वन्दिव्रातैरतुलविभवः प्रस्थितोऽभूत् स भूपः॥**

एवं नवमसर्गे जलक्रीडानन्तरं उद्यानात् राजधानीं प्रति राज्ञः प्रयाणमुपवर्णितम्।

## 16. संग्रामवर्णनम्

संग्रामवर्णन प्रसक्तिः द्वादशसर्गान्ते वर्तते।

## 17. नायकाभ्युदयवर्णनम्

चतुर्थसर्गे सुन्दरचोलस्य शैशवदारभ्य यौवनपर्यन्त भागे दृष्टम्। द्वादशसर्गे
राज्यवैभववर्णनेन अपि तत्कृतमेव।

**नृपसुतोत्तमरूपजितं च मां परिहसत्यबलाजन इत्यलम्।**
**हृदि निगूढवपुर्वसति ह्रिया रतिवरोऽतिवरोदितचापलः॥**
**प्रथितमीशपदार्चनकर्मणा प्रभुमभीक्ष्य पदच्युतिशङ्कया।**
**प्रतिनिशं गतनिद्रतयोषितं मधवताऽधवता दिवि चात्मनः॥**

“अलड्कृतमसंक्षिप्तं रसभावनिरन्तरम्” इति निरूपयितुं तेषां अतीव विस्तरत्वात् रसः अलङ्कारपोषणं इति विषयद्वयं पृथक् अध्यायरूपेण निरूपितम्। सर्वत्र भिन्नवृत्तान्तैः छन्दोविशेषाः पृथग्दर्शिताः वर्णनानां परिमाणविशेषेण केषाञ्चिन् सर्गाणां परिणाहित्वं संक्षेपो वा दृश्यते। केषुचित् सर्गेषु सपादश-तादप्यधिकाः श्लोकाः वर्तन्ते। नैषधादि काव्येष्वपि एवमेव दृश्यते ततः तावद्भिरपि श्लोकैः सर्गाणां अनतिविस्तीर्णत्वमेव।

## उपसंहारः

कविकर्णरसायनकाव्ये महाकाव्यलक्षणानि इत्थं प्रतिपादितम् सर्गबन्धो महाकाव्यमित्यादि प्राचीनालङ्कारिकैः प्रोक्तानि काव्य-लक्षणानि सर्वाणि

कविकर्णरसायकाव्ये दृश्यन्ते। ईश्वरस्तुत्या आशीरूपया मङ्गला-चरणं कृतम्।

**शिवकथाः शैववाङ्मये बहुधा प्रसिद्धाः। पुराणेषु न दृष्टाः अपि प्राचीनकथाः सर्वाः इतिहासाः भवन्त्येव। एवं रूपेण** कविकर्ण-रसायनकाव्ये अष्टादश वर्णानि महाकाव्यलक्षणानि प्रतिपादितम्

## उपयुक्तग्रन्थसुची


1. **कविकर्णरसायनम् –** प्राच्यविद्यासंशोधनालयः मैसूरुविश्व-विद्यालयः- मैसूरु -1975
2. **दशरूपकम् –** चौखाम्बा संस्कृतसिरीज् आफीस् – वारणासी – 1982
3. **काव्यादर्शः –** आन्ध्रप्रदेश साहित्य अकाडमी – हैदराबाद् – 1973
4. **कविकर्णरसायनम् –** प्राच्यविद्यासंशोधनालयः मैसूरुविश्व-विद्यालयः- मैसूरु -1975
5. **काव्यप्रकाशः –** सुरभारती समितिः – हैदराबाद् – 1990
6. **मुकुन्दमाला –** तिरुमलतिरुपति देवस्यानम् – तिरुपतिः – 1995